National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 323-325
© 2026 NJHSR
www.sanskritarticle.com

**Dr.Balabhadra Upadhyaya**
Head, Dept. of Atharvaveda,
S.V.Vedic University,
Tirupati

**Correspondence:**
**Dr.Balabhadra Upadhyaya**
Head, Dept. of Atharvaveda,
S.V.Vedic University,
Tirupati

# अथर्ववेदे विविधकर्माणि

**Dr. Balabhadra Upadhyaya**

पाणिनीयधातुपाठे अथर्वशब्दस्यार्थः थुर्वीधातु-हिंसायामित्यस्मिन्नर्थे भवति। हिंसा नाम क्रियमाणस्य कर्मणः वर्तमानस्य जीवनस्थितेः मानवाभिलाषस्य वा न्यूनताप्रतिपादनमस्तित्वनिरासः वा। तथा हि अथर्वशब्दस्य निर्वचनं निरुक्तकृता यास्काचार्येण एवम् उक्तम्यत्-

**"थर्वतिश्चरतिकर्मा, तत्प्रतिषेधः।"**[1]

एवं चरतेः गत्यर्थस्य प्रतिषेधेन निरुक्तः। एष च प्रतिषेधः स्थिरप्रकृतित्वेन भाष्यकृता दुर्गाचार्येण व्याख्यातः। ततः अथर्वशब्देन स्थिरप्रकृतिर्वेदः स्थिरत्वप्रतिपादको वा अथर्ववेदः इति स्पष्टं ज्ञायते। पुनश्च अथर्ववेदस्य गोपथब्राह्मणे कथितमस्ति यत्-

**"तद्यदब्रवीदथर्वाङेनमेतास्वेवाप्स्वन्विच्छेति तदथर्वाऽभवत्, तदथर्वणोऽथर्वत्वम्"**[2]

ऋग्वेदादयः त्रयोवेदाः आमुष्मिकं फलं प्रददाति तदाऽयं अथर्ववेदः आमुष्मिकेन सह ऐहिकफलमपि प्रयच्छति। जीवनं सुखसमन्वितं कर्तुं येषां साधनानाम् अपेक्षा भवति तेषां सिद्ध्यर्थम् अस्मिन्वेदे विभिन्नानाम् अनुष्ठानानां विधानं विहितमस्ति। अतः अथर्ववेदे मानवजीवनोपयोगि विभिन्नपक्षाणां विवेचनं वर्तते। मानवजीवनोपयोगि केषाञ्चन पक्षाणाम् मम मतानुसारम् अहं दृष्टिं सारयामि। यथा- शान्तिकपौष्टिककर्माणि, आयुष्यकर्माणि, सौमनस्यकर्माणि, भैषज्यकर्माणि च।

➢**शान्तिकपौष्टिककर्माणि-**

अथर्ववेदस्यापरो नामो अथर्वाङ्गिरोवेदः इति। एतस्य कारणं भवति यत् ऋषिद्वयेन अर्थात् अङ्गिराऋषि-अथर्वाऋषिश्च इति एताभ्याम् ऋषिभ्यां दृष्टानां मन्त्राणां समूहरुपो एव अथर्ववेदः। अतः अङ्गिरेदृष्टाः मन्त्राः आभिचारिकाः तथा अथर्वदृष्टाः मन्त्राः शान्तिपुष्टिकर्मयुक्ताः भवन्ति।

**शान्तिककर्माणि-** राष्ट्रे, ग्रामे, गृहे सर्वेषां कृते च यानि यानि शान्त्यर्थं कार्याणि क्रियन्ते तानि शान्तिकर्माणि इत्युच्यन्ते। ते यथा- गृहप्रवेशकर्म, पापनक्षत्रजननशान्तिः, दुःशकुनशान्तिः इत्यादयः भवन्ति। एतेषां शान्तिकर्मणां विवेचनमथर्ववेदे वर्तते। एतदर्थं अथर्ववेदस्य पञ्चकल्पानामन्तर्गते शान्तिकल्पः अन्यतमः। अस्मिन्कल्पे विविधप्रकारकशान्तिकर्मणां विवेचनमस्ति।

**पौष्टिककर्माणि-** पौष्टिकानि अर्थात् समृद्धिसाधकानि कर्माणि। समृद्धिः बहुभिः प्रकारैः सम्भवति। राज्यस्य यानि प्राकृतिकानि संसाधनानि सन्ति तेषां प्रथमतया संरक्षणं विकासश्च। यथा- नदीनां, पर्वतानां, वनानां च समृद्ध्यर्थं आदौ संरक्षणं विधेयम् अर्थात् राज्यस्य पोषणं तैः घटकैः निश्चीयते अन्यथा अभावः पदे पदे।

गृहमपि समृद्धेः कारणं वर्तते। मनुष्यः आजीवनं यदर्जति संग्रहणं करोति तत्सर्वं गृहे स्थापयति। अतः ऋषिणा प्रार्थना कृता- हे देवगणाः! अस्माकं गृहे पुत्रपौत्रादयः, गवाद्याः पशवः, धान्यानि च भवेयुः। गृहेस्थिताः द्विपाद् मनुष्याः चतुष्पाद् पशवश्च रोगमुक्ताः स्युः।

अग्निदाहः सार्वकालीनाः समस्याः वर्तन्ते। प्रतिवर्षम् अनेके मनुष्याः, पशवः, धनानि च अग्निना भस्मसात्भवन्ति। तत्कृतेऽपि शान्तिकर्म वर्तते।

**उक्तमस्ति मन्त्रे-**

**"आयने ते परायणे दूर्वा रोहतु पुष्पिणीः।**
**उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान्॥**
**अपामिदं न्ययनं समुद्रस्य निवेशनम्।**
**मध्ये ह्रदस्य नो गृहाः पराचीना मुखा कृधि॥**
**हिमस्य त्वा जरायुणा शाले परि व्ययामसि।**
**शीतह्‌रदा हि नो भुवोऽग्निष्कृणोतु भेषजम्॥"[3]**

राज्यस्य समृद्ध्यर्थं वणिक्वृत्तिरपि अपेक्षते। एतदर्थम् ऋषिर्वदति- वणिजः क्रयविक्रये उभये क्षेत्रे लाभप्रदाः स्युः। वणिजः धनं सदा वृद्धिं गच्छेत्। इन्द्रादयो देवाः व्यापारकर्मणि सहायकाः भवन्तु। यदि राष्ट्रस्य व्यापारः विफलो भवति सद्य एव तद्राष्ट्रं गर्ते गच्छेत्। वणिजां संरक्षणमपि सामाजिकानां राष्ट्रस्य च कर्त्तव्यमस्ति यथा-

**इन्द्रमहं वणिजं चोदयामि स न एतु पुरएता नो अस्तु।**
**नुदन्नरातिं परिपन्थिनं मृगं स ईशानो धनदा अस्तु मह्यम्॥[4]**

राष्ट्रस्य समृद्ध्यर्थं कृषिकार्यं महत्त्वपूर्णं वर्तते। कृषिकार्येणैव राष्ट्रस्य उन्नतिः भविष्यति। एतदर्थं बहुत्र भूमेः प्रार्थना दृश्यते यथा-

**शुनं सुफाला वितुदन्तु भूमिं शुनं कीनाशा अनुयन्तु वाहान्।**
**शुनासीरा हविषा तोषमाना सुपिप्पला ओषधीः कर्तमस्मै॥[5]**

➢ **आयुष्यकर्माणि-**

आयुः मनुष्याणां प्रथमं प्रयोजनं भवति। आयुः विना धनानां किमपि मूल्यं नास्ति। रोगाः दीर्घायुषि प्रायेण बाधकाः भवन्ति। अतः भैषज्यं दीर्घायुः प्राप्तये विधीयते। वेदोक्तमायुः शतसंवत्सरं सर्वेभ्यः अपेक्षितम्। सर्वैः जीवनं शतवर्षात्मकम् अधिकमपि काम्यते। आयुष्याभिवर्धकसूक्तानां पर्यालोचनेन वक्तुं शक्ये। देवताः प्रसन्नाः सन्ति चेत्मनुष्याः दीर्घायुष्मन्तः भवन्ति। अतः देवानां प्रसन्नत्वं परमावश्यकम्। एकः ऋषिः प्रार्थयति देवं हे देवगणाः! सावधानेन श्रृणुत युष्माकं ये सम्बन्धिनः तेऽपि सर्वे श्रृणुध्वम्, इमं यजमानं युष्मभ्यं समर्पये अस्य दीर्घं जीवनं कुरुत। यथा-

**ये वो देवाः पितरो ये च पुत्राः सचेतसो मे शृणुतेदमुक्तम्।**
**सर्वेभ्यो वः परिददाम्येतं स्वस्त्येनं जरसे वहाथ॥**
**ये देवा दिविष्ठ ये पृथिव्यां ये अन्तरिक्षमोषधीषु पशुश्वऽप्स्वन्तः।**
**ते कृणुत जरसमायुरस्मै शतमन्यान्परि वृणक्तु मृत्यून्॥[6]**

आयुषे हिरण्यबन्धनस्य विधानं मन्त्रेषु प्राप्यते-

**यदाबध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः।**
**तत्ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशारदाय॥**
**नैनं रक्षांसि न पिशाचाः सहन्ते देवानामोजः प्रथमजं ह्ये तत्।**
**यो बिभर्ति दाक्षायणं हिरण्यं स जीवेषु कृणुते दीर्घमायुः॥[7]**

एतदतिरिच्य यज्ञादौ, संस्कारेश्वपि आयुष्यसूक्तानां विनियोगः पठ्यते।

➢ **सौमनस्यकर्माणि-**

राष्ट्रे सौमनस्यं परमावश्यकं प्रतीयते। अन्यथा राष्ट्रं विनष्टं भवति। अत्र सौमनसस्य क्रमः गृहात्प्रारभ्यते, गृहात्ग्रामे-ग्रामादग्रे अन्ते च राष्ट्रे प्रसरति। अतएव वेदेषु गृहे सौमनस्यं कामयते, समाजे च सौमनस्यं प्रार्थितम्। लोकानां मध्ये विषमभावदूरीकरणाय सौमनस्यं दृश्यते। यदि सामाजिकानां मध्ये कलहः प्रवर्द्धेत अवश्यं समाजस्य कल्याणं न सम्पद्येत। कलहस्य प्रमुखं कारणं क्रोधो भवति। अतः क्रोधोपशमनाय सूक्तेऽस्मिन्मन्त्रः पठितः। कलहायमानस्य कृते अधस्तनमन्त्रे सौमनस्यभावः निगदितः यथा-

**अव ज्यामिव धन्वनो मन्युं तनोमि ते हृदः।**
**यथा संमनसौ भूत्वा सखायाविव सचावहै॥**
**सखायाविवसचावहा अव मन्युं तनोमि ते।**
**अधस्ते अश्मनो मन्युमुपास्यामि यो गुरुः॥[8]**

ऋग्वेदस्य संज्ञानसूक्तं सौमनस्यभावं प्रसारयति। स च भावः अथर्ववेदे षष्ठकाण्डे वर्तते। यथा-

**सं जानीध्वं सं पृच्यध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे संजानाना उपासते॥**
**समानो मन्त्रः समितिः समानी समानं व्रतं सह चित्तमेषाम्।**
**समानेन वो हविषा जुहोमि समानं चेतो अभिसंविशध्वम्॥[9]**

अथर्ववेदस्य तृतीयकाण्डस्य **"स हृदयं सांमनस्यमविद्वेशं..."** इति त्रिंशत्तमसूक्तस्य सप्तभिर्मन्त्रैः परिवारे सांमनस्य करणाय गम्भीरः विषयः प्रतिभाति। यावत् अन्तःकरणे प्रेम न जागर्ति तावत्बाह्यप्रयासः सौमनसस्य विफलः प्रतीयते। मनुष्यान्तर्भावः एव प्रमुखः भवति। अन्त स्नेहः आभामण्डले परिलक्ष्यते। अन्तर्भावं मनुष्यातिरिक्तः अन्योऽपिजीवः अङ्गीकरोति। अतएव सूक्तेऽस्मिन्प्रायेण अन्तः सौमनस्यभावः विस्तरेण स्थापितः।

एवम्प्रकारेण सप्तमकाण्डस्य एकादशतमे सूक्ते **"सभायांसभ्यैः"** सह शिष्ट शब्दानां प्रयोगो भवेत् न अन्यथा भाषणं कुर्यात्। वाग्मीभूत्वा कार्यं साधयेत्, एतेषां भावानां उल्लेखः वर्तते।

➢ **भैषज्यकर्माणि-**

रोगाणां शमनाय शत्रुणामसुराणाञ्च दमनाय ये उपयुज्यमाना औषधयः भवन्ति तानि कर्माणि भैषज्यानि इति कथ्यन्ते। अथर्ववेदे भैषज्यपरकानि बहूनि सूक्तानि प्राप्यन्ते। एतदर्थम् अथर्ववेदस्यापर नाम भैषज्यवेद इति। रोगाणां लक्षणं तच्छमनं तथा चिकित्सायाः विधयश्च बहुषु सूक्तेषु परिलक्ष्यते।

केचन रोगाः निर्दिष्टाः। यथा- तक्मा- यक्ष्मा- कुष्ठ- कास- क्लीबत्व- गण्डमाल-उन्मत्तता- मूत्रावरोध- रुधिरस्त्राव- हृद्रोग- क्षेत्रियरोगाश्च। तक्मन् शब्दः ज्वरविशेषस्य कृते प्रयुक्तः। अयं तक्मन् शब्दः अन्यत्र लौकिकसाहित्ये दुर्लभः। अस्य रोगस्य निदानमपि तत्र वर्तते। एकं कुष्ठनामकौषधम् उपन्यस्तं यस्योपयोगः कुष्ठरोगस्यापाकरणाय भवति। शरीरे एकः रोगः उत्पद्यते येन शरीरस्य बहुभागे,

श्वेतचिह्नमुपजायते, तत्कृते किलासशब्दः संहितायामुपलभ्यते। आस्रावः आधुनिकं नाम अतिसार इति अस्यापि विवेचनं दृश्यते। मूत्रावरोधस्य निदानमपि सूक्तेषु पठ्यते। अस्थिरोगसम्बन्धिनः केचन मन्त्राः-

**रोहण्यसि रोहण्यस्थ्नश्छिन्नस्य रोहणी। रोहयेदमरुन्धति॥**
**यत्ते रिष्टं यत्ते द्युतमस्ति पेष्ट्रं त आत्मनि।**
**धाता तद्भद्रया पुनः संदधत्परुषा परुः॥**
**सं ते मज्जा मज्ज्ञा भवतु समुते परुषा परुः।**
**सं ते मांसस्य विस्रस्तं समस्थ्यपि रोहतु॥**
**मज्जा मज्ज्ञा सं धीयतां चर्मणा चर्म रोहतु।**
**असृक्ते अस्थि रोहतु मांसं मांसेन रोहतु॥**
**लोम लोम्ना सं कल्पया त्वचा सं कल्पया त्वचम्।**
**असृक्ते अस्थि रोहतुच्छिन्नं सं धेह्योषधे॥**[10]

भैषज्यसूक्तानामध्ययनम् अस्मान् प्रबोधयति यत्र रोगाणां लक्षणं प्रथमं ज्ञातव्यं, तदनु निदानमन्वेषणीयं तथा औषधीनां प्रयोगः कथं भवेदिति ज्ञानमावश्यकं वर्तते।

औषधीनां प्रयोगात् प्राक्प्रार्थनायाः स्थानं दृश्यते, अर्थात् चिकित्सकः तद्ग्रहणात् पूर्वमेव मन्त्रेण औषधं स्तौति।

औषधीनां प्रयोगः द्विधा वर्तते। प्रथमः शरीरस्य कस्मिन् भागे औषधस्य बन्धनम्। द्वितीयम् औषधीनां पानम्। अन्योऽपि विधिः दृश्यते यथा अग्नौ औषधं प्रक्षिप्य तत् धूमः अपि रोगनिवारणाय भवति। अथर्ववेदे सर्वाधिकानि भैषज्यसूक्तानि सन्ति। आयुर्वेदस्य विकासः अथर्ववेदादेव मन्यते। तस्मात् अथर्ववेदस्य उपवेदः सुश्रुतसंहितायामायुर्वेदः इति पठितः यथा-

**"इह खलु आयुर्वेदो नाम यदुपांगमथर्ववेदस्य।"**[11]

इत्थं प्रस्तुते अंशे मया यथाशक्ति प्रतिपादितं सत् विस्तरात् विरम्यते। नमो वः॥

- **सहायकग्रन्थसूची-**

१.अथर्ववेद संहिता- स्वाध्याय मण्डल, नगर-पारडी, जिला-बलसाड, गुजरात

२. सुश्रुत संहिता- चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

३. गोपथब्राह्मणम्- चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली

४. निरुक्तम्- मेहरचन्द लछमनदास पब्लिकेशन्स्- नई दिल्ली

**पाद टिप्पणी:**

[1]निरुक्त ११.०२.१७

[2]गोपथब्राह्मण पूर्वभाग १.४

[3]अथर्ववेद ६.१०६.१-३

[4]अथर्ववेद ०३.१५.०१

[5]अथर्ववेद ०३.१७.०५

[6]अथर्ववेद ०१.३०.२,३

[7]अथर्ववेद ०१.३५.१,२

[8]अथर्ववेद ०६.४२.१,२

[9]अथर्ववेद ०६.६४.१,२

[10]अथर्ववेद ४.१२.१-५

[11]सुश्रुत संहिता १